नं. ५०५२

आश्वलायन गृह्यसूत्राणि.

× × × ×

पत्र. ३९ ——— सं. ×

छन्द पद्धति परिशिष्टं

आश्वलायनगृह्यसूत्राणि

५०५२

5052

F. = 39

आश्वलायन शाखीय

॥ अथगृह्यसूत्रप्रारंभः ॥

श्रीगणेशाय नमः॥ ॥हरिः ॐ ३॥ ॥ उक्तानि वैतानिकानि गृह्याणि वक्ष्या
मस्त्रयः पाकयज्ञा हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्र
ह्मणि हुता अथाप्यृच उदाहरंति यः समिधाय आहुती यो वेदेनेति समिध
मेवापि श्रद्दधान आदधन्मन्येत यज्ञ इदमिति नमस्तस्मै य आहुत्या यो वेदे
नेति विद्ययैवाप्यस्ति प्रीतिस्तदेतत्पश्यन्नृषिरुवाच॥ अ गोरुधाय गवि
षे द्युक्षाय दस्म्यं वचः॥ घृतात्स्वादीयो मधुनश्च वोचतेति वच एवम
इदं घृताच्च मधुनश्च स्वादीयोस्ति प्रीतिः स्वादीयोस्त्वित्येवतदाह॥ आ
ते॰ अग्न॰ ऋचा हविर्हृदातष्टं भरामसि॥ तेते भवंतूक्षण ऋषभा
सो वशा उत तेत्येत एवम उक्षाणश्च ऋषभाश्च वशाश्च भवंति य इमं

स्वाध्यायमधीयतइतियोनमसास्वध्वरइतिनमस्कारेणवैखल्वपि
नवैदेवानमस्कारमतियज्ञोवैनमइतिहिब्राह्मणंभवति॥ १॥ अथ
सायंप्रातःसिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यःसोमायव
नस्पतयेग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रा
यविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेत्यथबलिहरणमेताभ्यश्चैवदेवता
भ्योद्भ्यओषधिवनस्पतिभ्योगृहायगृहदेवताभ्योवास्तुदेवताभ्य
इंद्रायेंद्रपुरुषेभ्योयमाययमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमा
यसोमपुरुषेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येविश्वे
भ्योदेवेभ्यःसर्वेभ्योभूतेभ्योदिवाचारिभ्यइतिदिवानक्तंचारिभ्यइति

ग॰ सू॰ १
२

नक्तं रक्षोभ्य इत्युत्तरतः स्वधापितृभ्य इति प्राचीनावीती शेषं दक्षिणा नि
नयेत्॥२॥ ॥अथ परिशिष्टं॥ ॥अथ गृहबलिदेवतानां कीर्त्तयिष्यामो
यत्र यत्र वसंति ते॥ द्वारे पितामहं विद्यात् लक्ष्मीं च उमापतिं॥ आग्नेय्यां
बलभद्रं च यमं विष्णुं च दक्षिणे॥ नैर्ऋत्यां स्कंदं वरुणं च सोमं सूर्यं च पश्चि
मे॥ वायव्यामश्विनौ वसवः सोमो रुद्र उत्तरस्यां दिशि॥ ईशान्यां नक्षत्रा
णीद्र ग्रहाः पूर्वस्यां दिशि॥ गृहमध्ये ब्रह्माणं प्रतिष्ठाप्य ऋद्धि वृद्धि श्रि
या कीर्त्तिरिति ततः स्मार्त्तबलित्रयं गृहांगणे देयं विहितं॥ ये भूताः प्रच
रंति दिवानक्तं बलिमिच्छंतो विदुरस्य प्रेष्यास्तेभ्यो बलिं पुष्टिकामो हरा
मि मयि पुष्टिं पुष्टिपतिर्ददातु स्वाहा॥ ऐंद्र वारुण वायव्यां याम्यां नैर्ऋ

२

त्ति काश्चये।। तेकाकाः प्रतिगृह्णंतु भूम्यां पिंडं मयार्पितं।। वैवस्वत कुले जा
तौ द्वौ श्यामशबलौ शुनौ।। ताभ्यां पिंडो मया दत्तौ रक्षेतां पथि मांसदा।।
श्वचांडालभूतपतितवायसेभ्यो न्नं भूमौ निक्षिपेत्।। यमोसियमदू
तोसि वायसोसि नमोस्तुते।। सप्तजन्मकृतं पापं बलिं भक्षंतु वायसाः।।
क्रिमिकीटपतंगानां जंतूनां पापचारिणां।। तेसर्वे तृप्तिमायांतु मयाद
त्ते नभूतले।। गोदोहनमात्रं तत्र स्थित्वा तिथिमाकांक्षेद् दूत्तोपादोंप्रक्षा
ल्याचम्य गृहं प्रवेशयेत्।। शांताः पृथिवी शिवमंतरिक्षं द्यौर्नो देव्यभयं नो
अस्तु।। शिवा दिशाः प्रदिशाउद्दिशो न आपो विद्युतः परिपांतु सर्वतः शांतिः
शांतिः शांतिः।। १।। ।। इति परिशिष्टं।। ।। अथ खलु यत्र क्व चहोष्यन्त्स्यां

ग॰ सू॰ १

२

दिशुमात्रावरं सर्वतः स्थंडिलमुपलिप्योल्लिख्य षट्रूलेखा उदगायतां प
श्चात्प्रागायते नानांतयोस्तिस्रो मध्येतदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधा
य परिसमुह्य परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरत इत्युदकसंस्थं तूष्णीं
पर्युक्षणं पवित्राभ्यामाज्यस्योत्पवनम प्रच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमा
त्रौ कुशौ नानांतयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां
सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति प्रा
गुत्पुनाति सकृन्मंत्रेण द्विस्तूष्णीं कृता कृतमाज्यहोमेषु परिस्तरणं तथा

२

ज्यभागौ पाकयज्ञेषु ब्रह्मा च ध्रुवं तरियज्ञश्शूलगववर्जं मम सुष्मे स्वा
हेति जुहुयादग्निरिंद्रः प्रजापतिर्विश्वेदेवा ब्रह्मेत्यनादेशे एक बर्हिः

ध्माज्यस्विष्टकृतः स्युस्तुल्यकालास्तदेषाभियज्ञगाथागीयते॥ पाकयज्ञा
न्त्समासाद्यैकाज्यानेकबार्हिषः॥ एकःस्विष्टकृतःकुर्यान्नानापिसतिदैव
तइति॥ ३॥ उदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोप
नयनगोदानविवाहाः सार्वकालमेकेविवाहंतेषांपुरस्ताच्चतस्रआज्या
हुतीर्जुहुयादग्नआयूंषिपवसइतितिसृभिः प्रजापतेनत्वदेतान्यन्य
इतिचव्याहृतिभिर्वासमुच्चयमेकेनैकेकांचनत्वमर्यमाभवसियत्कनी
नामितिविवाहेचतुर्थं॥ ४॥ कुलमग्रेपरीक्षेतयेमातृतःपितृतश्चेति
यथोक्तंपुरस्ताद्बुद्धिमतेकन्यांप्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामर
रोगामुपयच्छेतदुर्विज्ञेयानिलक्षणान्यष्टौपिंडान्कृत्वर्तमग्रे

ग॰सू॰१ प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितं॥ यदियं कुमार्यभिजाता तदियमिह
४ प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिंडानभिमंत्र्य कुमारीं ब्रूयादेषा
मेकं गृहाणेति क्षेत्राच्चेदुभयतः सस्याद्गृह्णीयादन्नवत्यस्याः प्रजा
भविष्यतीति विद्याद्गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदा
सिनो ह्रदात्सर्वसंपन्ना देवनात्कितवी चतुष्पथाद्विप्रव्राजिनीरि
पाद्धन्याश्मशानात्पतिघ्नी॥५॥ अलंकृत्य कन्यामुदकपूर्वां द
द्यादेष ब्राह्मो विवाहस्तस्यां जातो द्वादशावरान्द्वादशपरान्पुनात्यु ४
भयतः ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो दशावरान्दश प
रान्पुनात्युभयतः सह धर्मं चरत इति प्राजापत्योऽष्टावरानष्टपरा

न्पुनात्युभयतो गोमिथुनं दत्वोपयच्छेत स आर्षः सप्तावरान्त्सप्त प
रान्पुनात्युभयतो मिथः समयं कृत्वोपयच्छेत स गांधर्वो धनेनोपतो
ष्योपयच्छेत स आसुरः सुप्तानां प्रमत्तानां वापहरेत्स पैशाचो हत्वा
भित्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः ॥ ६ ॥ अथ खलूच्चा
वचा जनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयाद्यत्तु समानं तद्वक्ष्या
मः पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुंभं समन्वा
रब्धायां हुत्वा तिष्ठन्प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृभ्णामि
ते सौभगत्वाय हस्तमित्यंगुष्ठमेव गृह्णीयाद्यदि कामयीत पुमां
स एव मे पुत्रा जायेरन्नित्यंगुलीरेव स्त्रीकामो रोमान्ते हस्तं सांगु

ग॰ सू॰ १

५

ष्ठमुभयकामः प्रदक्षिणमग्निमुदकुंभं च त्रिः परिणयं जपत्यमोह
मस्मि सा त्वं सा त्वमस्यमो हं द्यौरहं पृथिवी त्वं सामाहमृक्त्वं तावेह विव
हावहै॥ प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानो जीवेव शा
रदः शतमिति परिणीय परिणीयाश्मानमारोहयति ममश्मानमारोहा
श्मेव त्वं स्थिरा भव॥ सहस्व पृतनायतोभितिष्ठ पृतन्यत इति वध्वं ज
लावुपस्तीर्य भ्राता भ्रातृस्थानो वा द्विर्लाजानावपति त्रिर्जामदग्न्या
नां प्रत्यभिघार्य हविरवत्तं चैषोवदान धर्मोर्यमणं नु देवं कन्या अग्नि
मयक्षत॥ स इमां देवो अर्यमा प्रेतो मुंचातु नामुतः स्वाहा॥ वरुणं नु देवं
कन्या अग्निमयक्षत॥ स इमां देवो वरुणः प्रेतो मुंचातु नामुतः स्वा

५

हा॥ पूषणं नु देवं कन्या अग्निमयक्षत॥ स इमां देवः पूषा प्रेतो मुंचातु नामुतः स्वाहेत्यविच्छिंदत्यंजलिं स्रुचेव जुहुयाद् परिणीय शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थमो प्योप्यहैके लाजान् परिणयंति तथोत्तमे आहुती न संनिपततो यथा स्येन्द्रि रवे विमुंचति यदि कृते भवतः ऊर्णास्तुके के शपक्षयो बद्धे भवतः प्रत्वा मुंचामि वरुणस्य पाशादित्युत्तरामुत्तरया थ्रैनाम पराजितायां दिशि सप्तपदान्यभ्युत्क्रामयति इषे एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपदी मायो भव्याय चतुष्पदी प्रजाभ्यः पंचपदी ऋतुभ्यः षट्पदी सखा सप्तपदी भव सा मामनुव्रता भव॥ पुत्रान्विंदावहै बहूंस्ते संतु जरदष्टय इत्युभयोः संनिधाय शिरसी उदकुंभेनावसिच्य ब्राह्मण्या

गृ·सू·१

६

श्ववृद्धायां जीवपत्यां जीवप्रजायां अगार एतां रात्रीं वसेद्ध्रुवमरुंधतीं
सप्तऋषीनिति दृष्ट्वा वाचं विसृजेत जीवपत्नी प्रजां विंदेयेति ॥७॥ अथया
णउपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेद् रुक्मन्वती
रीयते संरभध्वमित्यर्धर्चेन नावमारोहयेद् उत्तरेणोऋमयेज्जीवंरुदं
तीति रुदत्यां विवाहाग्निमग्रतो जस्त्रं नयंति कल्याणेषु देशवृक्षचतुष्प
थेषु मा विदन् परिपंथिन इति जपेद् द्वासे वासे सुमंगली रियं वधूरिती क्ष
कानीक्षेते ह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेद् विवाहाग्नि
मुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मि
न्नुपविष्टायां समन्वारब्धायां मा नः प्रजां जनयतु प्रजापतिरिति च

६

तस्यक्षिः प्रस्यचंऊ त्वासमंजंतु विश्वेदेवाइतिदध्नः प्रान्यप्रतिप्रयच्छे
दाज्यशेषेणवा नक्तिहृदयेतऊ र्ध्वम क्षारालवणाशिनौ ब्रह्मचारि
णावलंकुर्वाणावधः शायिनौ स्यातांत्रिरात्रं द्वादशरात्रंसंवत्सरं वैक
ऋषिर्जायत इतिचरितव्रतः सूर्याविदे वधूवस्त्रंदद्यादन्नं ब्राह्मणेभ्यो
थस्वस्त्ययनं वाचयीत॥८॥ पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्य
पिवापुत्रः कुमार्यंतेवासी वानित्यानुगृहीतः स्याद्यदितूपशाम्येत्पत्न्यु
पवसेदित्येकेतस्याग्निहोत्रेणप्रादुष्करणहोमकालौ व्याख्यातौ होम्यं
चमांसवर्जंकामंतुव्रीहियवतिलैरग्नये स्वाहेति सायंजुहुयात्सूर्याय
स्वाहेतिप्रातस्तूष्णींद्वितीये उभयत्र॥९॥ अथपार्वणस्थालीपाकस्त

ग.सू.१

७

स्यदर्शपूर्णमासाभ्यामुपवासे इध्माबर्हिषोश्च सन्नहनं देवताश्चोपांशु
याजेन्द्रमहेन्द्रवर्जं काम्या इतरास्तस्यैतस्यै देवतायै चतुरश्चतुरो मुष्टीन्
निर्वपति पवित्रे अन्तर्धायामुष्मै त्वा जुष्टं निर्वपामीत्यथैनान्प्रोक्षति
यथानिरुप्तममुष्मै त्वा जुष्टं प्रोक्षामीत्यवहतांस्त्रिःफलीकृतान्ना
नाश्रपयेत्समोप्य वा यदि नानाश्रपयेद्विभज्य तण्डुलानभिमृशेद्
इदममुष्मा इदममुष्मा इति यद्यु वै समोप्य व्युद्धारं जुहुयाच्छृता
नि हवींष्यभिघार्योदगुद्वास्य बर्हिष्यासाद्य प्रत्यभिघार्येध्ममभि
घार्यायं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चा
स्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति तूष्णीं मा

७

7

घारा वाघार्याज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेत्युत्तरमाग्नेयं
दक्षिणं सौम्यं विज्ञायते चक्षुषी वा एते यज्ञस्य यदाज्यभागौ तस्मात्पु
रुषस्य प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं दक्षिणं मध्ये
हवींषि प्रत्यक्तरं वा प्राक्संस्थान्युदक्संस्थानि वोत्तरपुरस्तात्सौविष्टकृ
तं मध्यात्पूर्वार्द्धाच्च हविषोवद्यति मध्यात्पूर्वार्द्धात्पश्चार्धादिति पंचाव
त्तिनामुत्तरार्धात्सौविष्टकृतं नात्र हवींषि प्रत्यभिघारयति स्विष्टकृतं द्विरभि
घारयति यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरं॥ अग्निष्टत्स्वि
ष्टकृद्विद्वान्त्सर्वं स्विष्टं सुहुतं करोतु मे॥ अग्नये स्विष्टकृते सुहुतहुते
सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय

गृ॰सू॰१

८

स्वाहेति बर्हिर्षि पूर्णपात्रं निनयेदेषोवभृथः पाकयज्ञानामेतत्तंत्रं हवि
रुच्छिष्टं दक्षिणा॥१०॥ अथ पशुकल्पं उत्तरतोग्नेः शामित्रस्याय
तनं कृत्वा पाययित्वा पशुमाप्लाव्य पुरस्तात्तस्य स्रुवमवस्थाप्याग्निं
दूतमिति द्वाभ्यां कृत्वा सपलाशया शाखया पश्चादुपस्पृशेदमुष्मै
त्वा जुष्टमुपाकरोमीति व्रीहियवमतीभिरद्भिः पुरस्तात्प्रोक्षत्यमुष्मै
त्वा जुष्टं प्रोक्षामीति तासां पाययित्वा दक्षिणमनुबाहुं शेषं निनये
दात्तैव पर्यग्निकृत्वोदंचं नयंति तस्य पुरस्तादुल्मुकं हरंति शामि
त्र एष भवति वपाश्रपणीभ्यां कर्त्ता पशुमन्वारभते कर्त्तारं यजमा
नः पश्चाच्छामित्रस्य प्राक्शिरसं प्रत्यक्शिरसं वोदक्पादं संज्ञप्य

८

पुरानाभेस्तृणमंतर्धायवपामुत्खिद्यवपामवदायवपाश्रपणीभ्यांप
रिगृह्याद्भिरभिषिच्याग्रामित्रेप्रताप्याग्रेणेनमग्निंहृत्वादक्षिणत
आसीनःश्रपयित्वापरीत्यजुऊयादेतस्मिन्नेवाग्नौस्थालीपाकंश्र
पयंत्येकादशापशोरवदानानिसर्वांगेभ्योवदायशामित्रेश्रपयित्वा
हृदयंशूलेप्रताप्यस्थालीपाकस्याग्रतोजुऊयाद्वदानैर्वासहैकैक
स्यावदानस्यद्विर्द्विरवद्यत्यावृतैवहृदयशूलेनचरंति॥११॥ चैत्य
यज्ञेप्राक्स्विष्टकृतश्चैत्यायबलिंहरेद्यद्युवैविदेशस्थंपलाशदूतेनय
न्त्वेत्यथवनस्पतइत्येतयर्चाद्वौपिंडौकृत्वावीवधेभ्याधायदूतायप्र
यच्छेदिमंतस्मैबलिंहरेतिचैनंब्रूयाद्यंतुभ्यमितियोदूतायप्रतिभयंचै

ग॰ सू॰ १
९

दंतराशास्त्रमपिकिंचिन्नाव्याचेन्नद्यंतरांल्लवरूपमपिकिंचिद्नेन
तरितव्यमितिधन्वंतरियज्ञे ब्राह्मणमग्निं चांतरांपुरोहितायाग्रे बलिं
हरेत्॥१२॥ उपनिषद्गिगर्भलंभनं पुंसवनमनवलोभनंच यदिना
धीयात्तुती येगर्भमासेतिष्येणोपोषितायाः सरूपवत्सायांगोर्द
धानिद्वौद्वौतुमाषौयवंचदधिप्रसृतेनप्राशयेत्किंपिबसिकिंपिबसी
तिपृष्ट्वांपुंसवनंपुंसवनमितित्रिः प्रतिजानीयादेवंत्रीन्प्रसृतानथा
स्येमंडलागारच्छायायांदक्षिणस्यांनासिकायामजीतामोषधी
न्नस्तः करोतिप्रजावज्जीवपुत्राभ्यांहेके॥ आतेगर्भोयोनिमेतुपु
मान्बाणइवेषुधिं॥ आवीरोजायतांपुत्रस्तेदशमास्यः॥ अग्निरै

९

तुप्रथमोदेवतानां सोस्येप्रजां मुंचतु मत्युपाशात्॥ तदयं राजावरुणो
नुमन्यतां यथेयंस्त्री पौत्रमघंन रोदादिति प्राजापत्यस्यस्थालीपाक
स्यजुत्वा हृदय देशमस्याऽऽलभेतयत्ते सुसीमे हृदये हितमंतः प्रजा
पतौ॥ मन्येहंमांतद्विद्वांसंमाहंपौत्रमघन्नियामिति॥ १३॥ चतुर्थेग
र्भमासेसीमंतोन्नयनंमापूर्यमाणपक्षे यदापुंसानक्षत्रेण चंद्रमायु
क्तः स्यात् तथाग्निमुपसमाधाय पश्चादस्यान डुहंचर्मास्तीर्य प्राग्ग्री
वमुत्तरलोमं तस्मिन्नुपविष्टायां समन्वारब्धायां धातादददातु दाशुष इ
तिद्वाभ्यां राकामहमितिद्वाभ्यां नेजमेष प्रजापतेन त्वदेतान्यन्य इति
चांथास्येयुग्मेन शलाटुग्लप्सेन त्र्येण्याच शलल्या त्रिसिश्च कुशपिंज

लैरूर्ध्वं सीमंतं व्यूहति भूर्भुवः स्वरो३मिति त्रिश्श्वतुर्वा वीणागाथिनो संग्रा
स्तिसोमं राजानं संगायेतामिति सोमो नो राजावतु मानुषीः प्रजा निविष्टच
क्रासाविति यां नदीमुपवसिथा भवति ब्राह्मण्यश्च वृद्धा जीवपत्यो जीव
प्रजा यद्यदुपदिशेयुस्तत्तत्कुर्युर्ऋषभो दक्षिणा ॥ १४ ॥ कुमारं जातं पु
रान्यैरालंभात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत्प्रते ददामि
मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां ॥ आयुष्मान्गुप्तो देवताभिः
शतं जीव शरदो लोके अस्मिन्निति कर्णयोरुपनिधाय मेधाजननं जप
ति मेधां ते देवः सविता मेधां देवी सरस्वती ॥ मेधां ते अश्विनौ देवावा
धत्तां पुष्करस्रजाविति त्वं सावभिमन्त्र्यात्र स्मा भव परशुर्भव हिरण्यमस्तृ

तंभव॥ वेदोवैपुत्रनामासि सजीवन्शरदःशतमितींद्रश्रेष्ठानि द्रविणा
निधेह्यस्मेप्रयंधिमघवन्नृजीषिन्निति च नाम चास्मै दद्युर्घोषवदा
द्यंतरं तस्थंमभिनिष्ठानांतं द्व्यक्षरं चतुरक्षरं वा द्व्यक्षरं प्रतिष्ठाकामश्चतु
रक्षरं ब्रह्मवर्चसकामो युग्मानित्वेव पुंसामयुजानि स्त्रीणामभिवाद
नीयं च समीक्षेत तन्माता पितरौ विद्यातामोपनयनात् प्रवासादेत्य पु
त्रस्य शिरः परिगृह्य जपत्यंगादंगात्संभवसि हृदयादधिजायसे॥ आ
त्मावैपुत्रनामासि सजीवन्शरदःशतमिति मूर्धनि त्रिरवघ्रायाऽऽहू
तैव कुमार्यै॥ १५॥ षष्ठे मास्यन्नप्राशनमाज्यमन्नाद्यकामस्तैत्ति
रं ब्रह्मवर्चसकामो घृतौदनं तेजस्कामो दधिमधुघृतमिश्रमन्नं प्रा

= दध्योदनमिंद्रियकामः क्षीरोदनं पशुकामो = १

ग. सू. १

११

न्नायेदन्नपते न्नस्य नो देह्यनमीवस्य शुष्मिणः ।। प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्यावृतैव कुमार्यै ।। १६ ।। तृतीये वर्षे चौलं यथा कुलधर्मं वोत्तरतो ग्नेर्व्रीहियवमाषतिलानां पृथक्पूर्ण शरावाणि निदधाति पश्चात्कारयिष्यमाणो मातुरुपस्थ आनडुहं गोमयं नवे शरावे शमीपर्णानि चोपनिहितानि भवंति मातुः पिता दक्षिणत एकविंशति कुशपिंजूलान्यादाय ब्रह्मा वैतानि धारयेत्पश्चात्कारयिष्यमाणस्यावस्थाय शीतोष्णा आपः समानीयोष्णेन वाय उदकेनेहीति तासां गृहीत्वा नवनीतं दधिद्रप्सा न्वा प्रदक्षिणं शिरस्त्रिरुंदत्यदितिः केशान्वपत्वाप उंदंतु वर्चस इति दक्षिणे केशपक्षे त्रीणि त्रीणि कुशपिंजूलान्यभ्या

११

मिति

त्र्योंग्राणि निदधात्योषधे त्रायस्वैनं स्वधिते मैनं हिंसीरिति निवर्त्यञ्ज्ञा
लोहेन क्षुरेण प्रच्छिनत्ति येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरु
णस्य विद्वान्॥ तेन ब्रह्माणो वपतेदमस्यायुष्मान्जरदष्टिर्यथासदि
ति प्रच्छिद्य प्रच्छिद्य प्रागग्रान्छमीपर्णैः सह मात्रे प्रयच्छति तानानडुहे
गोमये निदधाति येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषे वपत्॥ तेन
त आयुषे वपामि सुश्लोक्याय स्वस्तय इति द्वितीयं येन भूयश्च रा
त्र्यां ज्योक्च पश्याति सूर्यं॥ तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय
इति तृतीयं सर्वैर्मंत्रैश्चतुर्थमेवमुत्तरतस्त्रिः क्षुरतेजो निमृज्ज्ये द्य
त्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान्॥ शुंधि शिरो मास्यायुः

ग. सू. १

१२

प्रमोषी रिति नापितं शिष्यां च्छीतोष्णाभिरद्भिरबर्थं कुर्वाणोक्षिणवन्कु
शाली कुर्वंति यथाकुलधर्मं केशावेशान्कारयेदावृतैव कुमार्यै ॥ १७ ॥
एतेन गोदानं षोडशे वर्षे केशशब्देतु श्मश्रुशब्दान्कारयेत् श्मश्रू
णी होंदति श्मुंधि शिरोमुखं मास्यायुः प्रमोषी रिति केशश्मश्रुलोम
नखान्युदक्संस्थानि कुर्वंति संप्रेष्य त्याप्लुत्य वाग्यतः स्थित्वाऽहः
शेषमाचार्यसकाशे वाचं विसृजेतवरं ददामीतिगोमिथुनं दक्षि
णा संवत्सरमादिशेत् ॥ १८ ॥ अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे
वैकादशे क्षत्रियं द्वादशे वैश्यमाषोडशाद्ब्राह्मणस्यानतीतः काल
आद्वाविंशात् क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वंपतितसावित्री

१२

काभवंति नैनानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरलं

कृतं कुमारं कुशलीकृतशिरसं महतेनवाससासंवीतं मैणेयेनवा

जिनेन ब्राह्मणं रौरवेण क्षत्रियं माजेनवैश्यंयदिवासांसिवसीरन्त्र

क्तानिवसीरन्काषायं ब्राह्मणो मांजिष्ठं क्षत्रियो हा

रिद्रं वैश्यस्तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्यावी वैश्य

स्य तेषां दंडः पालाशो ब्राह्मणस्यौदुंबरः क्षत्रियस्य बैल्वो वैश्यस्य के

शसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य घ्राणसंमितो वैश्यस्य ॥

॥१९॥ सर्वेवा सर्वेषांसमन्वारब्धेऽग्नौ त्तरतोग्नेः प्राङ्मुख आचा

र्यवतिष्ठते पुरस्तात्प्रत्यङ्मुख इतरोंपामंजलीपूरयित्वातत्सवि

तुष्णीमहइतिपूर्णेनास्यपूर्णमवक्षारयत्यासिच्यदेवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावितितस्य
पाणिनापाणिंसांगुष्ठंगृह्णीयात्सवितातेहस्तमग्रभीदसावितिद्विती
यमग्निराचार्यस्तवासावितितृतीयमादित्यमीक्षयेद्देवसवितरेषते
ब्रह्मचारीतंगोपायसमामृतेत्याचार्यःकस्यब्रह्मचार्यसिप्राण
स्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरिददामीतियुवासुवा
साःपरिवीतआगादित्यर्धर्चेनैनंप्रदक्षिणमावर्त्तयेत्तस्यांसौसो
पाणीकृत्वाहृदयदेशमालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्मचारी
तूष्णींसमिधमादध्यात्तूष्णींवैप्राजापत्यंप्राजापत्योब्रह्मचारीभव

ती तिविज्ञायते॥ २०॥ मंत्रेणहैकेऽग्नये समिधमाहार्षं बृहते जातवेदसे॥
तयात्वमग्नेवर्धस्वसमिधाब्रह्मणावयंस्वाहेति समिधमाधायाग्नि
मुपस्पृश्यमुखंनिमार्ष्टि त्रिस्तेजसामासमनज्मीति तेजसाह्येवात्मा
नं समनक्तीति विज्ञायते॥ मयिमेधां मयिप्रजां मय्यग्निस्तेजोदधातु॥
मयिमेधां मयिप्रजां मयीन्द्र इन्द्रियंदधातु मयिमेधां मयिप्रजां मयि
सूर्योभ्राजोदधातु॥ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने
वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासमित्यु
पस्थाय जान्वाच्योपसंगृह्य ब्रूयादधीहि भोः सावित्रीं भो ३ अनुब्रूही
ति तस्यवाससापाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्धर्च

ग॰ सू॰ १

१४

शाः सर्वां यथाशक्ति वाचयीत हृदयदेशेस्योर्ध्वांगुलिं पाणिमुपदधा
ति मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु ॥ मम वाचमेक
व्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति ॥ २१ ॥ मेखलामाबध्य दंडं
प्रदाय ब्रह्मचर्यमादिशे ब्रह्मचार्यस्यपोशान कर्म कुरु दिवा मा स्वाप्सी
राचार्याधीनो वेदमधीष्वेति द्वादशवर्षाणि वेदब्रह्मचर्यं ग्रहणांतं वा
सायंप्रातर्भिक्षेत सायंप्रातः समिधमादध्याद प्रत्याख्यायिनम
ग्रे भिक्षेतां प्रत्याख्यायिनीं वा भवान् भिक्षां ददात्वित्यनुप्रवच
नीयमिति वा तदाचार्याय वेदयीत तं तिष्ठेदहःशेषमस्तमिते ब्रह्मौद
नमनुप्रवचनीयं श्रपयित्वाऽऽचार्याय वेदयीताऽऽचार्यः सम

१४

न्वारब्धेनुब्रूयात्सदसस्पतिमद्भुतमितिसावित्र्याद्वितीयंयद्यत्किं
चातऊर्ध्वमनूक्तंस्यादृषिभ्यस्तृतीयंसोविष्टकृतंचतुर्थंब्राह्मणान्भो
जयित्वावेदसमाप्तिंवाचयीततातऊर्ध्वमक्षारालवणाशीब्रह्मचार्य
धःशायीत्रिरात्रंद्वादशरात्रंसंवत्सरंवाचरितव्रतायमेधाजननंक
रोत्यनिंदितायांदिश्येकमूलंपलाशंकुशस्तंबंवापलाशापचारे
प्रदक्षिणमुदकुंभेनत्रिःपरिषिंचंतंवाचयतिसुश्रवःसुश्रवाअसि
यथात्वंसुश्रवःसुश्रवाअस्येवंमांसुश्रवःसौश्रवसंकुरु॥ यथात्वं
देवानांयज्ञस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूया
समित्येतेनवापनादिपरिदानांतेव्रतादेशनंव्याख्यातमित्यनुपेत

ग॰ स्॰ १
१५

पूर्वस्यां थोपेतपूर्वस्य हूता हूतं केनावपनं मेधाजननं चानिरुक्तं परिदानं कालश्चं तत्सवितुर्वृणीमह इति सावित्री ॥२२॥ ऋत्विजो वृणीते न्यूनानतिरिक्तांगा न्येमात्ततः पितृतश्चेति यथोक्तं पुरस्ताद्धूनं ऋत्विजो वृणीत इत्येके ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारमथाध्वर्युमथोद्गातारं सर्वान्वा ये हीने काहैर्याजयंति सदस्यं सप्तदशं कोषीतकिनः समामनंति स कर्मणामुपद्रष्टा भवतीति तदुक्तं ऋग्भ्यां यमत्विजो बहुधा कल्पयंत इति होतारमेव प्रथमं वृणीतेऽग्निर्मे होता स मे होता होतारं त्वामुं वृणइति होतारं चंद्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वामुं वृणइति ब्रह्माणमादित्यो मेऽध्वर्युरित्यध्वर्युं पर्जन्यो मउद्गाते

१५

त्युज्ञातारंमापोमेहोत्राशंसिन्यइतिहोत्रकान्त्ररमयोमेचमसाध्वर्य
वइतिचमसाध्वर्यूंनाकाश्शोमेसदस्यइतिसदस्यंसवृतोजपेन्महन्मे
वोचोभर्गोमेवोचोभगोमेवोचोयशोमेवोचः स्तोमंमेवोचः क्लृप्तिं
मेवोचोभुक्तिंमेवोचस्तृप्तिंमेवोचः सर्वंमेवोचइतिजपित्वाग्निष्टे
होतासतेहोताहोताहंतेमानुषइतिहोताप्रतिजानीतेचंद्रमास्तेब्रह्मा
सतेब्रह्माब्रह्मैवमितरेयथादेशंतन्मामवतुतन्माविशतुतेनभुक्षि
षीयेतिचयाजयिष्यन्न्यस्तमार्त्विज्यमकार्यमहीनस्यनीचदक्षिणस्य
व्याधितस्यातुरस्ययक्ष्मगृहीतस्यानुदेश्याभिशस्तस्यक्षिप्तयोनेरि
तिचैतेषांसोमप्रवाकंपरिपृच्छेत्कोयज्ञः कऋत्विजः कादक्षिणेतिकल्या

णेः सह संप्रयोगो नमांसमश्नीयुर्न स्त्रियमुपेयुरा क्रतोरपवर्गो दतेनाग्ने ब्रह्मणा वावृधस्वेति दक्षिणाग्नावाज्याहुतिं हुत्वा यथार्थं प्रव्रजेद्देवमनाहिताग्निर्गृह्ये इमामग्ने शरणिं मीमृषो न इत्येतयर्चा ॥ २३ ॥ ऋत्विजो वृत्वा मधुपर्कमाहरेत्स्नातकायोपस्थिताय राज्ञे चाचार्यश्वशुरपितृव्यमातुलानां च दधनि मध्वानीय सर्पिर्वा मध्वलाभे विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयंते अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ॥ इदं तमधितिष्ठामि यो माकश्चाभिदासतीत्युदगग्रे विष्टर उपविशेदाक्रम्य वा पादौ प्रक्षालापयीत दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्सव्यं शूद्राय प्रक्षालितपादो

इसव्येपाणौ कृत्वा

र्घ्यमंजलिनाप्रतिगृह्याथाचमनीयेनाचामत्यमृतोपस्तरणमसी
तिमधुपर्कमाह्रियमाणमीक्षते मित्रस्यत्वाचक्षुषाप्रतीक्षइतिदेवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंज
लिनाप्रतिगृह्यमधुवाताऋतायतइतितृचेनावेक्ष्यानामिकयाचां
गुष्ठेनचत्रिःप्रदक्षिणमालोड्यवसवस्त्वागायत्रेणछंदसाभक्षयं
त्वितिपुरस्तान्निमार्ष्टिरुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंत्वितिदक्षिणतः
आदित्यास्त्वाजागतेनछंदसाभक्षयंत्वितिपश्चाद्विश्वेत्वादेवाआ
नुष्टुभेनछंदसाभक्षयंत्वित्युत्तरतोभूतेभ्यस्त्वेतिमध्यात्त्रिरुद्धृत्य
विराजोदोहोसीतिप्रथमंप्राश्नीयाद्विराजोदोहमशीयेतिद्वितीयंमयि

दोहः पद्यायै विराज इति तृतीयं न सर्वं न तस्मिं गछेद्ब्राह्मणायो ददुःदुच्छि
ष्टं प्रयच्छेद्दत्वाभेषु सर्वं वाऽथाचमनीयेनान्वाचामत्यमृतापिधानम
सीति सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति द्वितीयमाचान्तोदकाय
गां वेदयन्ते हतो मे पाप्मा पाप्मा मे हत इति जपित्वों कुरुतेति कारयि
ष्यन्माता रुद्राणां दुहिता वसूनामिति जपित्वोमुत्सृजते त्युत्सृक्ष्य
न्मांसो मधुपर्को भवति भवति॥२४॥ ॥इत्याश्वलायनगृह्यसू
त्रे प्रथमोध्यायः॥ ॥हरिः ॐ ३॥ ॥श्रावण्यां पौर्णमास्यां श्रवणा
कर्मा क्षतसक्तूनां नवं कलशं पूरयित्वा दर्वीं च बलिहरणीं नवे शिक्ये
निदधात्यक्षतधानाः कृत्वा सर्पिषार्धा अनक्त्यस्तमिते स्थालीपाकं

अपयित्वैककपालंचपुरोळाशमग्नेनयसुपथारायेऽस्मानितिच
तस्कृतिःप्रत्यंचंऊत्वापाणिनैककपालमच्युतायभौमायस्वाहेत्यवि
लुतःस्याद्दार्विःपृष्ठोवामानोअग्नेवस्तजोअघायेत्येनमाशायेनाभि
जुहोतिशंनोभवंतुवाजिनोहवेष्वित्यक्ताधानाअंजलिनामात्येभ्य
इतरादद्यात्कलशात्सक्तूनांदर्वींपूरयित्वाप्रागुपनिष्क्रम्यशुचौदेशेपो
वनिनीयसर्पदेवजनेभ्यःस्वाहेतिऊत्वानमस्करोतियेसर्पाःपार्थि
वायआंतरिक्ष्यायेदिव्यायेदिश्यास्तेभ्यइमंबलिमाहार्षंतेभ्यइमंब
लिमुपाकरोमीतिप्रदक्षिणंपरीत्यपश्चाद्बलेरुपविश्यसर्पोसिसर्पतांस
र्पाणामधिपतिरस्यन्नेनमनुष्यांस्त्रायसेपूपेनसर्पान्यज्ञेनदेवांस्त्व

यिमास्संतं त्वयिसंततः सर्पामाहिंसिषुर्ध्रुवांतेपरिददामीति ध्रुवामुंते ध्रुवा
मुंतइत्यमात्यानानुपूर्वं ध्रुवमांतेपरिददामीत्यात्मानमंततो नैनमंत
राव्यवेयुरापरिदानात्सर्पदेवजनेभ्यः स्वाहेति सायंप्रातर्बलिं हरेदा
प्रत्यवरोहणात्समसंख्यायहैके तावतोबलीस्तदहरेवोपहरंति ॥१॥ आ
श्वयुज्यामाश्वयुजीकर्म निवेशनमलंकृत्य स्नाताः शुचिवाससः पशु
पतये स्थालीपाकं निरूप्यजुहुयुः पशुपतये शिवाय शंकराय पृषातका
यस्वाहेति पृषातकमंजलिना जुहुयाद्भूनंमेपूर्यतांपूर्णंमेमोपसद
त्पृषातकायस्वाहेति सजूर्ऋतुभिः सजूर्विधाभिः सजूरिंद्राग्निभ्यां
स्वाहा॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वेभ्योदेवेभ्यः स्वाहा॥ स

न्हः र्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृथिवीभ्यां स्वाहेत्याहिताग्नेरा
ग्रयणस्थालीपाको नाहिताग्नेरपि शालाग्नौ ॥२॥ मार्गशीर्ष्यां प्रत्य
वरोहणं चतुर्दश्यां पौर्णमास्यां वा निवेशनं पुनर्नवीकृत्य लेपनं स्तर
णोपस्तरणैरस्तमिते पायसस्य जुहुयुरपश्वेतपदा जहि पूर्वेण चा
परेण च ॥ सप्त च वारुणीरिमाः सर्वाश्च राजबांधवीः स्वाहा ॥ न वै श्वे
तश्चाध्याँगारे हिर्जघान किंचन ॥ श्वेताय वैदार्वाय नमः स्वाहेति नात्र
सोविष्टकृदभयं नः प्राजापत्येभ्यो भूयादित्यग्निमीक्षमाणो जपति
त्रिवो नः सुमना भवेति हेमंतं मनसा ध्यायात्पश्चादग्नेः स्वस्तरं स्वा
स्तीर्णं स्तस्मिन्नुपविश्ये स्योना पृथिवि भवेति जपित्वा संविशेत्सामा

गृ॰ सू॰ २

१९

19

त्यः प्राक्शिरा उदगग्रमुखो यथावकाशमितरे ज्यायाञ्ज्यायाञ्चानं
तरो मंत्रविदो मंत्राञ्जपेयुः संहायांतो देवा अवंतु न इति त्रिरेतां दक्षि
णामुखाः प्रत्यङ्मुखा उदङ्मुखाश्चतुर्थं संहाय सौर्याणि स्वस्त्ययना
नि च जपित्वान्नं संस्कृत्य ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयीत ॥
॥३॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां
वा पूर्वेद्युः पितृभ्यो दद्यादोदनं कृसरं पायसं चतुःशरावस्य वापूपानुद्दी
रतामवर उत्परास इत्यष्टाभिर्हुत्वा यावतीभिर्वा कामयीताथश्वो
भूतेष्टकाः पशुना स्थालीपाकेन वाप्यनडुहो यवसमाहरेदग्निना वा
कक्षमुपोषेदेषा मेष्टकेति न त्वेवानष्टकः स्यात्तां हैके वैश्वदेवीं ब्रुवते

१९

आग्नेयीमेके सौर्यामेके प्राजापत्यामेके रात्रिदेवतामेके नक्षत्रदेवता
मेक ऋतुदेवतामेके पितृदेवतामेके पशुदेवतामेके पशुकल्पेन पशुं संज्ञप्य
प्रोक्षणोपाकरणवर्जं वपामुत्खिद्य जुहुयाद्वहवपां जातवेदः पितृभ्यो
यत्रैनान्वेत्थ निहितान्पराके मेदसः कुल्याउपैनान्स्रवंतु सत्याएता
आशिषः संतु सर्वाः स्वाहेत्यथावदानानां स्थालीपाकस्य चाग्ने नयसु
पथा राये अस्मानिति हुं ग्रीष्मो हेमंत ऋतवः शिवा नो वर्षाः शिवा अभ
याः शरन्नः ॥ संवत्सरोऽधिपतिः प्राणदो नो अहोरात्रे कृणुतां दीर्घमायुः स्वा
हा ॥ शांता पृथिवी शिवमंतरिक्षं द्यौर्नो देव्यभयं नो अस्तु ॥ शिवा दि
शः प्रदिशः उद्दिशो नः आपो विद्युतः परि पांतु सर्वतः स्वाहा ॥ आपो म

री-चीः प्रवहंतु नोधियो धाता समुद्रो वहंतु पापं॥ भूतं भविष्यद्भयं
विश्वमस्तु मे ब्रह्माधिगुप्तः स्वाराक्षराणि स्वाहा॥ विश्वे आदित्या वसवश्च
देवा रुद्रा गोप्तारो मरुतः सदंतु॥ ऊर्जं प्रजाममृतं पिन्वमानः प्रजापति
र्मयि परमेष्ठी दधातु स्वाहा॥ प्रजापते न त्वदेतान्यन्यः सोविष्ट कृत्यष्ट
मी ब्राह्मणान्भोजयेदित्युक्तं॥४॥ अपरेद्युरन्वष्टक्यं तस्यैव मांसस्य
प्रकल्प्य दक्षिणाप्रवणेऽग्निमुपसमाधाय परिश्रित्योत्तरतः परिश्रि
तस्य द्वारं कृत्वा समूलं बर्हिस्त्रिरपसलैरविधून्वन्परिस्तीर्य हवी
ष्यासादयेदोदनं कृसरं पायसं दधिमंथान्मधुमंथांश्च पिंडपितृयज्ञ
कल्पेन ऊ त्वा मधुमंथवर्जं पितृभ्यो दद्यात्स्त्रीभ्यश्च सुराचाचाममि

त्यधिकं कर्षूष्वेकैं द्वयोः षट्सु वा पूर्वासु पितृभ्यो दद्याद् अपरासु स्त्रीभ्यः
एतेन माघ्यावर्षं प्रोष्ठपद्या अपरपक्षे मासि मासि चैवं पितृभ्यो युक्षु प्रति
ष्ठापयेन्नवावरान्भोजयेद् अयुजो वायुग्मान्वृद्धिपूर्त्तेष्वयुग्मानितरेषु प्रद
क्षिणमुपचारो यवैस्तिलार्थः ॥५॥ रथमारोक्ष्यन्नानापाणिभ्यां चक्रे
अभिमन्त्रयेद् अहं ते पूर्वं पादावारभे बृहद्रथंतरे ते चक्रे वामदेव्यमक्षइत्य
क्षाधिष्ठाने दक्षिणपूर्वाभ्यामारोहेद्वायोष्टूवीर्येणारो [illegible] हामी इ
स्योजसाधिपुत्येनेति रश्मीन्त्संमृशेदरश्मिकान्वा दंडेन ब्रह्मणो वस्ते
जसा संगृह्णामि सत्येन वः संगृह्णामीत्यभिप्रवर्त्तमानेषु जपेत्स
हस्तसनिं वाजमश्वि वर्त्तस्व रथ देव प्रवह वनस्पते वीडुं गो हि भूया इत्ये

ग॰ सू॰ २

२१

तयान्यान्यपिवानस्पत्यानि स्थिरो गावो भवतां वीळुरक्षइतिरथांग
मभिमन्त्रौ त्सुत्रामाणं पृथिवीं द्यामनेहसमितिनावं नवरथेनंयत्रा
स्विनं वृक्षं कृदंवा विदासिनंप्रदक्षिणंकृत्वाफलवतीः शाखाआहरेदन्य
द्वाकौटुंबं संसदमुपययाया दस्माकमुत्तमंकृधी त्यादित्यमीक्षमाणोज
पित्वावरोहेदृषभंमासमानानामित्यभिक्राम न्वयमद्येंइस्यप्रेष्ठाद
त्यस्तंयात्यादित्येतद्वोदिवोदुहितरो विभातीरितिव्युष्टायां॥ ६॥ अ
थातो वास्तुपरीक्षा नूरवरमविबद्धिष्णुभ्रूमौषधिवनस्पतिवद्यस्मिन्कु
शावीरिणप्रभ्रूतं कंटकिक्षीरिणस्तु समूलान्परिखायोद्वासयेदपामा
र्गः शाकस्तिल्वकः परिव्याधइतिचैतानियत्रसर्वतआपोमध्यंसमेत्य

२१

प्रदक्षिणं स्नायनीयं परीत्य प्राच्यः स्यंदेरन्न प्रवदत्यस्तत्सर्वं समर्द्धं स
मवस्तवे भैक्तशरणं कारयेद्वृक्षन्नं हमवति दक्षिणाप्रवणे सभां मा
पयेत्साद्यूताहमवति युवानस्तस्यां कितवाः कलहिनः प्रमायुकाभ
वंति यत्र सर्वतत्थापः प्रस्यंदेरन्त्सा सच स्त्ययन्यद्यूता च॥ ७॥ त्र
थैतैर्वा वास्तु परीक्षेत जानुमात्रं गर्त्तं खात्वा तैरेव पांसुभिः प्रतिपूरये
दधिके प्रशस्तं समे वार्त्तं न्यूने गर्हितं मस्तमिते पांपूर्णं परिवासये
त्सोदके प्रशस्तं माद्रे वार्त्तं शुष्के गर्हितं श्वेतं मधुरास्वादं सिकतोत्करं ब्रा
ह्मणस्य लोहितं क्षत्रियस्य पीतं वैश्यस्य तत्सहस्तसीतं कृत्वा यथा
दिक्समचतुरस्रं मापयेद्दायतचतुरस्रं वा तच्छमीशाखयोदुंबरशा

तः

ग॰ सू॰ २ एवया वा शांता तीयेन त्रिः प्रदक्षिणं परिव्रजन्नो क्षत्यविच्छिन्नया चो
२२ दकधारया आपो हि ष्ठा मयोभुव इति तृचेन वंशांतरेषु शरणानि कारयेत्
तैं स्ववकाशी पालमित्यवधापयेन्नास्यदाऊकं भवतीति विज्ञायते म
ध्यमस्थूणायां गर्त्तं विधाय प्रागग्रोदगग्रान्कुशानास्तीर्य व्रीहियवम
22 ती रपत्र्या सेचयेद च्युताय भौमाय स्वाहेत्यथैनामुच्छ्रीयमाणाम
नुमंत्रयेत इहैव तिष्ठ निमिता तिल्विला स्ता मिरावती मध्ये पोषस्य तिष्ठंती॥
आत्वा प्रापन्न घायव आत्वा कुमारस्तरुण आवत्सो जायतां सह॥
आत्वा परिश्रितः कुंभ आदध्नः कलशैरयन्निति॥ ८॥ वंशमाधी २२
यमानमृतेन स्थूणामधिरोह वंश दीर्घायुरायुः प्रतरं दधाना इ

तिसदूर्वासु चतसृषु शिलासु मणिकं प्रतिष्ठापयेत्पृथिव्या अधि संभ
वेत्यरंगरो वावदीति त्रेधा बद्धो वरत्रया॥ इरामुह प्रशंसत्यनिरामप
बाधतामिति वा। अथास्मिन्नप आसेचयेदेतु राजा वरुणो रेवतीभिर
स्मिं स्थाने तिष्ठतु मोदमानः॥ इरां वहंतो घृतमुक्षमाणा मित्रेण साकं स
ह संविशंत्वित्यथैनच्छमयति व्रीहियवमतीभिरद्भिर्हिरण्यमवधाय
शंतातीयेन त्रिः प्रदक्षिणं परिव्रजन्नोक्षत्यविच्छिन्नया चोदकधारया
पो हि ष्ठा मयोभुव इति तृचेन मध्येऽगारस्य स्थालीपाकं श्रपयित्वा वास्तो
ष्पते प्रति जानीह्यस्मानिति चतसृभिः प्रत्यृचं हुत्वान्नं संस्कृत्य ब्राह्म
णान्भोजयित्वा शिवं वास्तु शिवं वास्त्विति वाचयीत॥ २॥ उक्तं गृहप्र

ग॰ सू॰ २

२३

23

क्षेत्रस्यानुवातं २

पदनं बीजवतो गृहानपद्येत क्षेत्रं प्रकर्षयेदुत्तरैः प्रोष्ठपदैः फल्गु
नीभी रोहिण्या वा क्षेत्रस्य पतिना वयमिति प्रत्यृचं जुहुयाज्जपेद्वा
गाः प्रतिष्ठमाना अनुमंत्रयेत मयोभूर्वातो अभिवातूस्रा इति
द्वाभ्यामायतीर्यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च॥ ता नः
संतु पयस्वतीर्बह्वीर्गोष्ठे घृताच्याः॥ उप मैतु मयोभुव ऊर्जं चोजं
श्च बिभ्रतीः॥ दुहाना अक्षितं पयो मयि गोष्ठे निविशध्वं यथा भ
वाम्युत्तमः॥ यादेवेषु तन्व मैरयंतेति च सूक्तशेषमागावीयमेके
गणानामासामुपतिष्ठेतां गुरु गवीनां भूतास्थ प्रशस्ता स्थ शोभ
नाः प्रियाः प्रियो वो भूयासं शां मयि जानीध्वं शाम्म यि जानीध्वं॥१०॥

२३

॥ ॥ इत्याश्वलायनगृह्यसूत्रे द्वितीयोध्यायः॥ ॥ हरिः ॐ ३॥ ॥ अथा
तः पंचयज्ञाः देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्ययज्ञ इ
ति तद्यदग्नौ जुहोति स देवयज्ञो यद्बलिं करोति स भूतयज्ञो यत्पितृ
भ्यो ददाति स पितृयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यन्मनुष्ये
भ्यो ददाति स मनुष्ययज्ञ इति तानेतान्यज्ञानहरहः कुर्वीत ॥ १ ॥ अ
थस्वाध्यायविधिः प्राग्वोदग्वा ग्रामान्निष्क्रम्याऽप आप्लुत्य शुचौ दे
शे यज्ञोपवीत्याचम्याऽक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूला
नां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय प
वित्रवंतौ विज्ञायतेऽपां वा एष ओषधीनां रसो यद्दर्भाः सरसमेव

ग॰ सू॰ ३
२४

तद्ध स्म करोति द्यावापृथिव्योः संधिमीक्षमाणः संमील्य वा यथा वा
युक्तमात्मानं मन्येत तथा युक्तोऽधीयीत स्वाध्यायं मोंपूर्वा व्याहृ
तयः सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्वामिति तृतीयं ॥ २ ॥ अथ स्वा
ध्यायमधीयीत ऋचो यजूंषि सामान्यथर्वांगिरसो ब्राह्मणानि क
ल्पान्गाथानाराशंसीरितिहासपुराणानीति यदृचोऽधीते पयआ
हुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि
मध्वाहुतिभिर्यदथर्वांगिरसः सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान्
गाथानाराशंसीरितिहासपुराणान्यमृताहुतिभिर्यदृचोऽधीते
पयसः कुल्या अस्य पितॄन्स्वधा उपक्षरंति यद्यजूंषि घृतस्य कुल्याः

यत्सामानि मध्वः कुल्या यदथर्वांगिरसः सोमस्य कुल्या यद्ब्राह्मणा
निकल्पा गाथा नाराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः
स यावन्मन्येत तावदधीत्यैतया परिदधाति नमो ब्रह्मणे नमो
अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः॥ नमो वाचे नमो वाच
स्पतये नमो विष्णवे महते करोमीति॥ ३॥ देवतास्तर्पयति प्रजापति
र्ब्रह्मा वेदा देवा ऋषयः सर्वाणि छंदांस्योंकारो वषट्कारो व्याहृतयः
सावित्री यज्ञा द्यावापृथिवी अंतरिक्षमहोरात्राणि संख्याः सिद्धाः स
मुद्रा नद्यो गिरयः क्षेत्रौषधिवनस्पति गंधर्वाप्सरसो नागा वयांसि
गावः साध्या विप्रा यक्षा रक्षांसि भूतान्येवमंतान्यथ ऋषयः श

गृ॰ सू॰ ३

२५

25

= शांखा:

तर्चिनो माध्यमांगृत्समदो विश्वामित्रो वामदेवोत्रिर्भरद्वाजो वसिष्ठः
प्रगाथाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति प्राचीनावीती सुमंतुजैमि
निवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या जानंतिबा
हविगार्ग्यगोतमशाकल्यबाभ्रव्यमांडव्यमांडूकेया गार्गी वाचक्नवी
वडवा प्रातीथेयी सुलभा मैत्रेयी कहोळं कौषीतकं महाकौषीतकं पैं
ग्यं महापैंग्यं सुयज्ञं सांख्यायनमैतरेयं महैतरेयं शाकळं बाष्क
ळं सुजातवक्रं मौदवाहिं महौदवाहिं सौजामिं शौनकमाश्वलाय
नं ये चान्ये आचार्यास्ते सर्वे तृप्यंत्विति प्रतिपुरुषं पितॄंस्तर्पयि
त्वा गृहानेत्य यद्ददाति सा दक्षिणा अथापि विज्ञायते स यदि तिष्ठन्न

२५

जन्मासीनःशायानोवायंयंक्रतुमधीते तेन तेन हास्य क्रतुनेष्टं भवती
ति विज्ञायतेतस्यह्वावनध्यायौयदात्माऽशुचिर्यद्देशः॥४॥अथातोध्या
योपाकरणमोषधीनांप्रादुर्भावेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवा
त्यभागोऊर्ध्वां ज्याकृती जुहुयात्सावित्र्यैब्रह्मणेश्रद्धायैमेधायै
प्रज्ञायैधारणायैसदसस्पतयेनुमतयेछंदोभ्यऋषिभ्यश्चेत्यथद
धिसक्तून्जुहोत्यग्निमीळेपुरोहितमित्येकाकुषुंभक स्तदब्रवीद्दा
वदंस्त्वंराकुनेभद्रमावदगणानाजमदग्निनाधामंतेविश्वंभुवन
मधिश्रितं गंतानोयज्ञंयज्ञियाःसुशमियोनःस्वोअरणःप्रतिच
क्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायत्तेराजन्छृतंहविरितिद्वचाःस

ग॰सू॰३ मानीवत्याकूतिरित्येकांतच्छंयोरावृणीमहइत्येकोऽध्येष्यमाणोध्या
प्येरन्चारब्धं एताभ्योदेवताभ्योहुत्वा सोविष्टकृतंहुत्वादधिसक्तून्प्रा
२६ श्यततोमार्जनमपरेणाग्निंप्राक्कूलेषुदर्भेषूपविश्योदपात्रेदर्भान्कृ
त्वाब्रह्मांजलिकृतोजपेदोंपूर्वाव्याहृतयःसावित्रीचत्रिरभ्यस्यवे
२८ दादिमारभेत्तथोत्सर्गेषण्मासानधीयीतसमावृत्तोब्रह्मचारिकल्पे
नयथान्यायमितरेजायोपेयेत्येकेप्राजापत्यंतद्वार्षिकमित्येत
दाचक्षतेमध्यमाष्टकायामेताभ्योदेवताभ्योन्नेनहुत्वापोभ्यव २६
यंत्येताएवतद्देवतास्तर्पयंत्याचार्यान्ऋषीन्पितॄंश्चेतदुत्सर्जनं॥
॥५॥ अथकाम्यानांस्थानेकाम्याश्चरवस्तानेवकामानाप्नोत्य

थ व्याधितस्यातुरस्यं यक्ष्मगृहीतस्य वा षड्क्लौ ऊँ इति श्वरू मुंचामि त्वाहवि
षा जीवनायकमित्येतेन स्वप्नमम मनोऽहं दृष्टुं घ्रानो देव सवितरिति द्वा
भ्यां यच्च गोषु दुःष्वप्न्यमिति पंचभिरादित्यमुपतिष्ठेत योमेराजन्यु
ज्योवा स खावेति वा क्षुत्वा जृंभित्वा ऽमनोऽहं दृष्ट्वा पापकं गंधमाघ्रा
यांक्षि स्पंदने कर्णध्वनने च सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चामु
खेन सुश्रुत्कर्णाभ्यां मपिदक्ष्मकृत् इति जपेद्गमनीयां गत्वाऽया
ज्यं याजयित्वाऽभोज्यं भुक्त्वाऽप्रातिग्राह्यं प्रतिगृह्य चैत्यं यूपं वोप
हत्यै पुनर्मामैत्विंद्रियं पुनरायुः पुनर्भगः॥ पुनर्इविणमेतु मां पु
नर्ब्राह्मणामेतु मां स्वाहा॥ इमेयेधिष्ण्यासो अग्नयो यथास्थानमि

गृ॰ सू॰ ३ हकल्पतां॥ वैश्वानरोवावृधानोंतर्यछतुमेमनोहृद्यंतरममृतस्यकेतुः

२७ स्वाहेत्याज्याहुतीर्जुहुयात्समिधोवाजपेद्वा॥६॥ अव्याधितंचेत्स्व

पंतमादित्योभ्यस्तमियाद्वाग्यतोनुपविशन्नात्रिशेषंभूत्वायेनसूर्

27

र्यज्योतिषाबाधसेतमइतिपंचभिरादित्यमुपतिष्ठेताभ्युदियाच्चे

दकर्मश्रांतमनभिरूपेणकर्मणावाग्यतइतिसमानमुत्तराभिश्च

तस्रृभिरुपस्थानंयज्ञोपवीतीनित्योदकः संध्यामुपासीतवाग्यतः

= प = सायमुत्तरापराभिमुखोन्वष्टमदेशंसावित्रींजपेदर्धास्तमिते २७

मंडलेआनक्षत्रदर्शनादेवंप्रातःप्राङ्मुखस्तिष्ठन्नादित्यमंडल

दर्शनात्कपोतश्चेदगारमुपहन्यादनुपतेद्वादेवाःकपोतइतिप्र

स्यचंजुकुयाज्जपेद्वा वयमु त्वापथस्पतइ त्यर्थंचर्यांचरिष्यन्त्संप्र

षान्विदुषेति नष्टमधि जिगमिषन्प्रणोवा संपूषन्नध्वन इतिमहांत

मध्वानमेष्यन्प्रतिभयंवा॥ ७॥ अथैतान्युपकल्पयीत समावर्त्त

मानो मणिंकुंडले वस्त्रयुगं छत्रमुपानद्युगं दंडं स्रजमुन्मर्दनमनु

लेपनमांजनमुष्णीषमित्यात्मनेचाचार्यायचयद्युभयोर्न विंदेता

चार्यायैव समिधं त्वाहरेदपराजितायां दिशि यज्ञियस्य वृक्षस्या

इमिन्नाद्यकामः पुष्टिकामस्तेजस्कामो वा ब्रह्मवर्चसकाम उपवा

तामुभयीमुभयकामं उपरि समिधं कृत्वा गामन्नंच ब्राह्मणेभ्यः

प्रदायगोदानिकं कर्मकुर्वीत त्वामनिमंत्र्यान्त्संनमयेदेकक्लीत

ग॰ सू॰ ३

२८

केनग्नीतोष्णाभिरद्भिः स्नात्वा युवं वस्त्राणिपीवसा वसाथेइत्यहतेवाससी आच्छाद्याश्मनस्तेजोसिचक्षुर्मेपाहीतिचक्षुषी आंजयीताश्मनस्तेजोसिश्रोत्रंमेपाहीतिकुंडले आबध्नीतानुलेपनेनपाणी प्रलिप्यमुखमग्रे ब्राह्मणोनुलिंपेद्बाहूराजन्य उदरं वैश्य उपस्थं स्त्र्यूरूसरणजीविनोनार्त्तास्यनार्त्तोहंभूयासमितिस्रजमपिबध्नीतनमालोत्कांमालेतिचेद्ब्रूयुः स्रगित्यभिधापयीतदेवानांप्रतिष्ठेस्थः सर्वतोमापातमित्युपानहावारुह्यायदिवश्छद्मासीतिछत्रमादत्तेवेणुरसिवानस्पत्योसिसर्वतोमापाहीतिवेणवंदंडमायुष्यमितिसूक्तेनमणिंकंठेप्रतिमुच्याोष्णीषंकृत्वातिष्ठन्त्समिधमादध्यात्॥८॥स्मृतं

२८

निंद्रा च विद्या च श्रद्धा प्रज्ञा च पंचमी॥ इष्टं दत्त मधीतं च कृतं सत्यं श्रुतं
व्रतं॥ यदग्ने सेंद्रस्य सप्रजापतिकस्य सऋषिकस्य सऋषिराजन्यस्य
सपितृकस्य सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य सा
काशस्य सातीकाशस्य सानूकाशस्य सप्रतीकाशस्य सदेवमनुष्यस्य स
गंधर्वाप्सरस्कस्य सहारण्यैश्च पशुभिर्ग्राम्यैश्च यन्म आत्मन आत्म
नि व्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतो भवामि स्वाहेति ममाग्नेव
र्च इति प्रत्यृचं समिधो भ्याद ध्याद्यत्रेनं पूजयिष्यंतो भवंति तत्रै
तां रात्रीं वसेद्विद्यांते गुरुमर्थेन निमंत्र्य कृतानुज्ञातस्य वा स्नानं
तस्यैतानि व्रतानि भवंति न नक्तं स्नायान्न नग्नः स्नायान्न न

ग्नः स्नायीत न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनाद्वर्षति न धावेन्न वृ
क्षमारोहेन्न कूपमवरोहेन्न बाहुभ्यां नदीं तरेन्न संशयमभ्या
पद्येत महद्वै भूतं स्नातको भवतीति विज्ञायते ॥ १ ॥ गुरवे प्रसक्ष्य
माणो नाम प्रब्रुवीतेदं वत्स्यामो भो इत्युच्चैरूर्ध्वं नाम्नः प्राणापा
नयोरुपांश्वामंत्रैरिंद्रहरिक्षिरिति चांतो वृद्धो जपति प्राणापानयो
रुरुव्यचास्तया प्रपद्ये देवाय सवित्रे परिददामीत्यचंच समाप्यों
श्राक्स्वस्तीति जपित्वा महित्रीणामित्यनुमंत्र्यैवमतिसृष्टस्य न
कुतश्चिद्भयं भवतीति विज्ञायते वयसामम नो ज्ञा वाचः श्रुत्वा
कनिक्रदज्जनुषं प्रब्रुवाणा इति सूक्तं जपेद्दैवीं वाचमजनयंतदे

वाइतिचंस्तुहिश्रुतंगर्त्तसदंयुवानमितिमंगस्यंयस्यादिशोबिभीयां
यस्माद्वातांदिशोमुल्मुकमुभयतःप्रदीप्तंप्रत्यस्येन्मंथंवाप्रसव्यमा
लोड्यांभयंमित्रावरुणामह्यमस्त्वर्चिषाशत्रून्दहंतंप्रतीत्यमाज्ञा
तारंमाप्रतिष्ठांनुदंतुमिथोभिंदानाउभयंतुमह्युमितिसंसृष्टंधनमु
भयंसमाकृतमितिमंथंन्यंचंकरोति॥१०॥सर्वतोभयादनाज्ञातादृ
ष्टावाज्याहुतीर्जुहुयात्पृथिवीवृतासाग्निनावृतातयावृतयावर्त्र्या
यस्माद्भयाद्बिभेमितद्वारयेस्वाहा॥अंतरिक्षंवृतंतद्वायुनावृतंतेन
वृतेनवर्त्रेणयस्माद्भु०॥द्यौर्वृतासादित्येनवृतातयावृतयावर्त्र्याय
स्माद्भु०॥दिशोवृतास्ताश्चंद्रमसावृतास्ताभिर्वृताभिर्वर्त्राभिर्यस्मात्०॥

=विं=

ग॰ स्तू॰ ३
३०

आपो वृतास्ता वरुणेन वृतास्ताभिर्वृताभिर्वत्रेश्मिर्यस्माद्भ॰ ॥ प्रजा
वृतास्ताः प्राणेन वृतास्ताभिर्वृताभिर्वत्रेश्मिर्यस्माद्भ॰ ॥ वेदावृतास्ते छं
दोभिर्वृतास्तैर्वृतैर्वत्रैर्यस्माद्भ॰ ॥ सर्वंवृतंतद्ब्रह्मणावृतं तेन वृतेन वत्रे
णयस्माद्भयाद्विभेमित द्वारये स्वाहेत्यथापराजितायां दिश्यवस्था
यस्वस्त्यात्रेयंजपतियत इंद्र भयामह इतिच सूक्तशेषं ॥ ११ ॥ सं
ग्रामे समुपोह्ले राजानं संनाहयेदात्वाहार्षमंतरेधीतिपश्चादस्थ
स्यावस्थाय जीमूतस्येवभवतिप्रतीकमितिकवचंप्रयच्छेदुत्तरया
धनुरुत्तरांवाचयेत्स्वयंचतुर्थं जपेत्पंचम्येषुधिंप्रयच्छेदभिप्र
वर्त्तमानेषष्ठीं सप्तम्याश्चानष्टमीमिषूनवेक्षमाणंवाचयत्यहि

३०

30

रिवभ्योगैः पर्य्येतिबाहूमितितलंनह्यमानमथैनंसारयमाणमुपारू
ह्याभीवर्तेवाचयतिअयोवांमित्रावरुणेतिचद्वेअथैनमन्वीक्षेताप
तिरथश्वासःसौपर्णैःअधारयंतुमधुनोघ्नतस्येत्येतत्सौपर्णंसर्वादिशो
नुपरियायादादित्यमौशानसंवावरुछायप्रयोधयेदुपश्चासयपृथिवी
मुतद्यामितितच्चेनदुंदुभिमभिमृशेदवसृष्टापरापततेतीषून्विसर्जये
द्यत्रबाणाःसंपतंतीतियुध्यमानेषुजपेत्संशिष्याद्वासंशिष्याद्वा॥१२॥
॥॥इत्याश्वलायनगृह्यसूत्रेतृतीयोध्यायः॥ ॥हरिःॐ३॥ ॥आहि
ताग्निश्चेदुपतपेत्प्राच्यामुदीच्यामपराजितायांवादिश्युदवस्येद्गाम
कामाअग्नयइत्युदाहरंत्याशंसंतएनंग्राममाजिगमिषंतोऽगदंकुर्यु

ग॰ सू॰ ४

३१

रितिहविर्णायते गदः सोमेन पशुनेष्ट्वेष्ट्वा वस्येदनिष्ट्वा वा संस्थिते भूमि
भागं खानयेद्दक्षिणपूर्वस्यां दिशि दक्षिणापरस्यां वा दक्षिणाप्रवणं
प्राग्दक्षिणाप्रवणं वा प्रत्यग्दक्षिणाप्रवणमित्येके यावानुद्बाहुकः पुरु
षस्तावदायामं व्याममात्रं तिर्यग्वितस्त्यवागभितआकाशं श्मशानं
बहुलौषधिकं कंटकिक्षीरिणस्त्विति यथोक्तं पुरस्ताद्यत्र सर्वतआ
पः प्रस्यंदेरन्नेतदादहनस्य लक्षणं श्मशानस्य केशश्मश्रुलोमनखा
नीत्युक्तं पुरस्ताद्द्विगुल्फं बर्हिराज्यं च दधन्यत्र सर्पिरानयंत्येतत्पित्र्यं
पृषदाज्यं ॥ १ ॥ अथैतां दिशमग्नीन्नयंति यज्ञपात्राणि चान्वंचं
प्रेतमयुजो मिथुनाः प्रवयसः पीठचक्रेण गोयुक्तेनेत्येकेऽनुस्तर

३१

31

पंगी गाम जां वैकवर्णा ब्रह्मामे के सव्ये बाहौ बध्वा नुसंकालयं त्य न्वं
चो मा त्या ग्न धो नि वी ताः प्रवृत्त शिखा ज्येष्ठप्रथमाः कनिष्ठजघन्याः
प्राप्येवं भूमि भागं गर्त्तोदके नद्यामी शाखया त्रिः प्रसव्यमायनं परि व्र
जन्नो क्ष त्यपेत वीत वि च सर्पतात इति दक्षिण पूर्व उद्धृ तांत म्राहवनी
यं निद ध्यात्युत्तर पश्चिमे गार्हपत्यं दक्षिणपश्चिमे दक्षिण मथै नमं
तर्वेदी ध्मचितिं चि नो ति यो जा नाति तस्मि न्बर्हिरास्तीर्य ब्रह्माजि
नं चो त्तर लोमं त स्मि न्ने तं संवेशायं त्युत्तरेणगार्ह पत्यं हृत्वाऽऽहव
नी यम भि मु ख शिर सं मुत्तर तः पत्नीं धनुश्च क्षात्रियाय तामुत्था
पये द्देवरः प तिस्थानी यों तेवासी जरद्दासो वोदीर्ष्व नार्य भिजी

संचितिमचित्वा

वलोकमितिकर्त्ता वृषलेजपेदनुर्हस्तादाददानो मृतस्येति धनुरुक्तं वृ
षले धिज्यं कृत्वा संशीर्यानुप्रहरेत्॥२॥ अथैतानि पात्राणि योजयेद्द
क्षिणेहस्ते जुहूं सव्य उपभृतं दक्षिणे पार्श्वे स्फ्यं सव्येग्निहोत्रहवणी
मुरसि ध्रुवां शिरसि कपालानि दत्सु ग्राव्णो नासिकयोः स्रुवौ भित्वा चै
कं कर्णयोः प्राशित्रहरणे भित्वा चैकमुदरे पात्रीं समवत्तधानं च चम
सं मुपस्थे शम्या मरणी ऊर्वोरूलूखलमुसले जंघयोः पादयोः शूर्पे
छित्वा चैकं मासेचनवंतिपृषदाज्यस्य परयं त्यमापुत्रो दृषदुपले
कुवरं तं लौहायसं च कौलालं मनुस्तरण्या वपामुत्खिद्य शिरो मु
खं प्रच्छादयेदग्नेर्वर्मपरिगोभिर्व्ययस्वेति वृक्का उद्धृत्य पाण्योरा

दध्याद्दतिद्वसारमेयौश्वानाविति दक्षिणे दक्षिणं सव्ये सव्यं हृदये हृ
दयं पिंड्यौ चैके वृक्काप चार इत्येके सर्वं यथांगं विनिक्षिप्य चर्मणाप्र
च्छाद्येमममग्ने चमसं माविजिह्वर इति प्रणीताप्रणयनमनुमंत्रयते
सव्यं जान्वाच्य दक्षिणाग्नावाज्याहुती जुहुयादग्नये स्वाहा कामा
य स्वाहा लोकाय स्वाहानुमतये स्वाहेति पंचमीमुरसि प्रेतस्यास्मा
द्वैत्वमजायथा अयं त्वदधिजायतामसौ स्वर्गाय लोकाय स्वाहेति ॥
॥ २ ॥ प्रेष्यति युगपदग्नीन्प्रज्वालयतेत्याहवनीयश्चेत्पूर्वं प्राप्नुयात्स्व
र्गलोक एनं प्रापदिति विद्याद्धात्यत्यसावमुत्रैवमयमस्मिन्निति पु
त्रो गार्हपत्यश्चेत्पूर्वं प्राप्नुयादंतरिक्षलोक एनं प्रापदिति विद्याद्ध

ग॰ सू॰ ४
३२

त्स्य त्यसाव मुत्रैव मयमस्मिन्निति पुत्रौ दक्षिणाग्निश्चेत्स्वर्गप्रापनु
यान्मनुष्यलोक एनं प्रापदिति विद्यादाात्स्य त्यसाव मुत्रैव मयम
स्मिन्निति पुत्रौ युगपत्माप्नो पराम्दद्धिंवदंति तंदह्यमानमनुमंत्रय
ते प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति समानं सहैवं विद्वादह्यमानः सहै
व धूमेन स्वर्गलोकमेतीति विज्ञायत उत्तरपुरस्ताद्दाहवनीयस्य जा
नुमात्रं गर्त्तं खात्वा ऽवकां शीपालमित्यवधापयेत्ततो ह वा एष नि
ष्क्रम्य सहैव धूमेन स्वर्गलोकमेतीति विज्ञायत इमे जीवा वि मृते
शा ववृत्रन्निति सव्यावृतो व्रजंत्यनवेक्षमाणा यत्रोदकमवह
द्भवति तत्प्राप्य सकृदुन्मज्ज्यैकांजलिमुत्सृज्य तस्य गोत्रं नाम च

३३

33

गृही त्वौत्तीर्यान्यानि वासांसि परिधाय सकृदेनान्यापीड्योदगद्दशा
निविसृज्यासतं आनक्षत्रदर्शनादादित्यस्य वा दृश्यमाने प्रवि
शेयुः कनिष्ठप्रथमा ज्येष्ठजघन्याः प्राप्यागारमश्मानमग्निं गो
मयमक्षतांस्तिलान् पउपस्पृशंति नैलस्यां रात्र्यामन्नं पचेरन्
क्रीतोत्पन्नेन वा वर्तेरंस्त्रिरात्रमक्षारालवणान्नाः स्युर्द्वादश
रात्रं वा महागुरुषु दानाध्ययने वर्जयेरन् दशाहं सपिंडेषु गुरौ चास
पिंडे प्रत्तासु च स्त्रीषु त्रिरात्रमितरेष्वाचार्येषु ज्ञातो चासपिंडे ग प्र
त्तासु च स्त्रीषु दंतजाते परिजाते चैकाहं सब्रह्मचारिणि समानग्रा
मीये च श्रोत्रिये॥४॥ संचयनमूर्ध्वं दशाम्याः कृष्णपक्षस्यायु

जास्वेकनक्षत्रे लक्षणेकुंभे पुमांसमलक्षणायां स्त्रियं मयुजोमिथु
नाः प्रवयसः क्षीरोदकेनशामीशाखयां त्रिः प्रसव्यमायतनंपरिव्र
जन्त्रोक्षतिशीतिकेशीतिकावती ह्लादिके ह्लादिकावतीत्यंगुष्ठोपकनिष्ठिकाभ्यामेकैकम
स्थसंस्काराद्यंतोवदध्युः पादौपूर्वं शिरउत्तरं सुसंचितंसंचित्यपवनेनसं
सूर्ययत्रसर्वतआपोनाभिः स्यंदेरन्नन्यावर्षाभ्यस्तत्रगर्त्तेवदध्युरुपस
र्पमातरंभूमिमेतामित्युत्तरयापांसूनवकिरेदवकीर्योत्तरामुत्तेस्तभ्ना
मीतिकपालेनापिधायाथानवेक्षंप्रत्याव्रज्योपउपस्पृश्यश्राद्धमस्मै
दद्युः ॥५॥ गुरुणाभिमृता अन्यतोवापक्षीयमाणा अमावास्यायांदग्ना
तिकर्मकुर्वीरन्पुरोदयादग्निंसहभस्मानंसहायतनंदक्षिणाहरेयुः क्र

व्याद मग्निंप्रहिणोमि दूरमित्यर्धर्चेन तंचतुष्पथेन्युप्य यत्रवात्रिः प्रस
व्यंपरियंति सव्यैःपाणिभिः सव्यानूरू नाघ्नानाअथानवेक्षंप्रत्याव्र
ज्यापउपस्पृश्य केशश्मश्रुलोम नखानि वापयित्वोपकल्पयीरन्न
वान्मणिकान्कुंभा नाचमनीयांश्च शमीसुमनोमालिनःशमीमयमि
ध्मंशमीमय्याकरणी परिधींश्चानडुहं गोमयंचर्मचनवनीतमश्मा
नंयावत्योयुवतयस्तावंति कुशपिंजूलान्यग्निवेलायामग्निंजनये
मिहेवायमितरोजातवेदा इत्यर्धर्चेन तंदीपयमानाआसतआशांत
रात्रोदायुष्मतांकथाःकीर्त्तयंतोमांगल्यानीतिहासपुराणान्या
ख्यापयमानाउपरतेषुशब्देषु संप्रविष्टेषुवागृहंनिवेशनंवादक्षिणा

चै

कीर्ति

गृ॰ सू॰ ४

द्वारपक्षात्त्रक्रम्यां विच्छिन्नामुदकधारां हरेत्तंतुं तन्वन्न जसो भानु

मन्विही त्योत्तरस्मादथाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्ती

र्यं प्राग्ग्रीवमुत्तरलोम तस्मिन्नमात्यानारोहयेदारोहतायुर्जरसं वृणा

नाइतीमं जीवेभ्यः परिधिं दधामीति परिधिं परिदध्यादंतर्मृत्युं दध

तां पर्वतेनेत्युत्तरतोग्नेरश्मानं कृत्वा परंमृत्योअनुपरेहि पंथामिति

चतसृभिः प्रत्यृचं कृत्वा यथाहान्यनुपूर्वं भवंती त्यमात्यानीक्षेत युवतयः

पृथक्पाणिभ्यां दर्भतरुणकैर्नवनीतेनचांगुष्ठोपकनिष्ठि

काभ्यामक्षिणी आंज्य परांच्यो विसृजेयुरिमानारीरविधवाः सुप

त्नीरित्यं जनाई क्षेतात्र्मन्वतीरीयते संरभध्वमित्यश्मानं कर्त्ता प्र

३५

३५

३५

थमोक्षिमन्त्रोदथापराजितायांदिश्यवस्थायांग्निनानडुहेगोमयेन
चाविच्छिन्नयाचोदकधारयापोहिष्ठामयोभुवइतितृचेनपरीमेगाम
नेषतेतिपरिक्रामत्सुजपेत्पिंगलोनडुहान्परिणेयःस्यादित्युदाहरं
त्यथोपविशंतियत्राभिरंस्यमानाभवंत्यहतेनवाससाप्रच्छाद्या
सतेस्वपंतआोदयाउदितआदित्येसोर्याणिस्वस्त्ययनानिचजपि
त्वान्नंसंस्कृत्याऽपनःशोशुचदघमितिप्रत्यृचंहुत्वाब्राह्मणान्भो
जयित्वास्वस्त्ययनंवाचयीतगोःकंसोऽहतंवासश्चदक्षिणा॥६॥
अथातःपार्वणेश्राद्धेकाम्यआभ्युदयिकएकोद्दिष्टेवाब्राह्मणान्श्रु
तशीलवृत्तसंपन्नानेकेनवाकालेज्ञापितान्स्नातान्कृतपच्छौचा

नांन्वांतानुदस्युरवान्वित्तवउपवेश्यैकैकमेकैकस्यद्वौद्वौत्रींस्त्री
न्वांदृत्त्वोपफलभूयस्त्वंनत्वेवैकंसर्वेषांकाममनाद्येविडैर्व्याख्यात
मपःप्रदायदर्भान्द्विगुणभुग्नानासनंप्रदायापःप्रदायतैजसा
श्ममयमन्मयेषुत्रिषुपात्रेष्वेकद्रव्येषुवादर्भान्तर्हितेष्वपःप्रदायशंं
नोदेवीरभिष्टयइत्यनुमंत्रितासुतिलानावपतितिलोसिसोम
देवत्योगोसवेदेवनिर्मितः॥प्रत्नवद्भिःप्रत्तःस्वधयापितृनिमां
ल्लोकान्प्रीणयाहिनःस्वधानमइतिप्रव्येनेतरपाणयंगुष्ठांतरेणो
पवीतित्वांद्दक्षिणेनवासव्योपगृहीतेनंपितरिदंतेर्घ्यंपितामहे
दंतेर्घ्यंप्रपितामहेदंतेर्घ्यमित्यप्पूर्वंताःप्रतिग्राहयिष्यन्त्सकृ

त्सकृत्स्वधा अर्घ्या इति प्रसृष्टा अनुमंत्रयेत् या दिव्या आपः पृथिवि संबभूवुर्या अंतरिक्ष्या उत पार्थिवी याः॥ हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना भवंत्विति संस्रवान्त्समवनीय ताभिरद्भिः पुत्रकामो मुखमनक्ति नोद्धरेत् प्रथमं पात्रं पितॄणामर्घ्यपातितं॥ आवृतास्तत्रा तिष्ठंति पितरः शौनको ब्रवीत्॥ उद्धरेद्यदि चेत्पात्रं विवृतं वायदा भवेत्॥ तदासुरं भवेच्छ्राद्धं क्रुद्धैः पितृगणैर्गतैरिति॥ ७॥ एतस्मिन्काले गंधमाल्यधूपदीपाच्छादनानां प्रदानमुद्धृत्यघृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा प्रत्यभ्यनुज्ञां क्रियतां कुरुष्व कुर्वित्यथाग्नौ जुहोति यथोक्तं पुरस्तादभ्यनुज्ञायां

गृ० सू० ४

३७

37

पाणिष्वेववाग्निमुखावैदेवाः पाणिमुखाः पितरइतिहिब्राह्मणंयदिपा
णिष्वाचांतेष्वन्यदन्नमनुदिशेत्यन्नमन्नेसृष्टंदत्तमधुकमितितस्मान्
ज्ञात्वामधुमतीश्रावयेदक्षन्नमीमदंतेतिचसंपन्नमितिपृष्ट्वायद्यदन्न
मुपभुक्तंतत्तत्स्थालीपाकेनसहपिंडार्थमुद्धृत्यशेषंनिवेदयेदभिमतेनु
मतेवाभुक्तवत्स्वनाचांतेषुपिंडान्निदध्यादाचांतेष्वेकेप्रकीर्यान्नमुप
वीयोंस्वधोच्यतामितिविसृजेदस्तुस्वधेतिवा॥ ८॥ अथशूलगवः
शरदिवसंतेवार्द्रयाश्रेष्ठंस्वस्ययूथस्याकुष्ठिपृषत्कल्माषमित्येके
कामंकृष्णमालोहवांश्चेद्व्रीहियवमतीभिरद्भिरभिषिच्यशिरस्तआभस
थोरुद्रायमहादेवायजुष्टोवर्धस्वेतितंवर्धयेत्संपन्नदंतमृषभंवा

३७

यज्ञियायां दिश्यसंदर्शने ग्रामादूर्ध्वमर्धरात्रादुदित इत्येके वैधं च
रित्रवंतं ब्राह्मणमुपवेश्य सपलाशामाईशाखां यूपं निखाय व्रतस्यौ
कुशरज्ज्वा वा रशने अन्यतरया यूपं परिवीयान्यतरयार्धशिरसि
पशुं बध्वा यूपे रशनायां वा नियुनक्ति यस्मै नमस्तस्मै त्वा जुष्टं नियु
नज्मीति प्रोक्षणादि समानं पशुना विशेषान्वक्ष्यामः पात्र्यापला
शेन वा वपां जुहुयादिति हविर्ज्ञायते हराय मृडाय शर्वाय शिवाय भ
वाय महादेवायोग्राय भीमाय पशुपतये रुद्राय शंकरायेशानाय
स्वाहेति षड्भिर्वोत्तरै रुद्राय स्वाहेति वा चतस्रः षु चतस्रः षु कुशास्रूना
स्रु चतस्रः षु दिक्षु बलिं हरेद्यास्ते रुद्र पूर्वस्यां दिशि सेनास्ताभ्य ए

ग॰ सू॰ ४

३८

38

नं नमस्ते अस्तु मा मा हिंसीरित्येवं प्रतिदिशं त्वा देवानं चतुर्भिः सूक्तै
श्चतस्रो दिशा उपतिष्ठेत कद्रुद्राय इमा रुद्राय याते पितरिमा रुद्राय स्थिर
धन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानं तुषान्फलीकरणांश्च पु
छं चर्म शिरः पादानित्यग्नावनुप्रहरेज्झोगं चर्मणा कुर्वीतेति शांवत्य
उत्तरतो ग्नेर्दर्भवीतासु कुशासु नामसुवा शोणितं निनयेच्छ्वासिनी घो
षिणी र्विचिन्वतीः समश्नुवीः सर्पा एतद्वो नेनवः प्रीणातीत्यथो
दङ्ङावृत्य श्वासिनी घोषिणी र्विचिन्वतीः समश्नुवीः सर्पा एतद्वोत्र
तद्धरध्वमिति सर्पेभ्यो यत्तत्रासृग्वध्यं वाव स्नुतं भवति तद्धरं
ति सर्पाः सर्वाणि ह वा अस्य नामधेयानि सर्वाः सेनाः सर्वाण्युच्छ्र

३८

यमाणानीत्येवंविद्यजमानंप्रीणाति नास्य ब्रुवाणं च न हिनस्तीति विज्ञा
यते नास्य ग्राश्नीयान्नास्य ग्राममाहरेयुरग्निमारूको ह्येष देवः प्रजाश्च भव
तीत्यमात्यानं ततः प्रतिषेधयेन्नियोगाच्चुप्राश्नीयात्स्वस्त्ययन इति
स एष शूलगवो धन्यो लोक्यः पुण्यः पुत्र्यः पशव्य आयुष्यो यशास्य इ
ष्टान्यमुत्सर्जेन्नानुत्सृष्टः स्यान्महापशुर्भवतीति विज्ञायते शंताताती यं
जपन्नहानियात्पशूनामुपतापएतमेव देवं मध्ये गोष्ठस्य यजेत स्था
लीपाकं सर्वहुतं बर्हिराज्यं चानुप्रहृत्य धूमतो गा आनयेच्छंताताती यं
जपन्पशूनां मध्यमियान्मध्यमि यान्नमः शौनकाय नमः शौ
नकाय ॥ २॥ ॥ इत्याश्वलायनगृह्यसूत्रे चतुर्थोध्यायः॥ ॥

ग०सू०४

३९

॥ इतिगह्यसूत्रंसमाप्तं ॥

६१२५

३९